National Journal of
Hindi & Sanskrit Research

**ISSN: 2454-9177**
NJHSR 2019; 1(24): 139-140
© 2019 NJHSR
www.sanskritarticle.com

**डॉ.युद्धिष्ठिरसाहुः**
संस्कृतविभागाध्यक्षः,
रेभेन्साविश्वविद्यालयः,
कटक, ओडिशा

**Correspondence:**
**डॉ.युद्धिष्ठिरसाहुः**
संस्कृतविभागाध्यक्षः,
रेभेन्साविश्वविद्यालयः,
कटक, ओडिशा

# श्रीभागवतेसंदेशानुशीलनम्

**डा. युधिष्ठिरसाहुः**

प्रत्यहं सविता प्रातरुदेति सायमस्तमेति च। अनया मतानुगतिकया रीत्या सः प्राणिनामायुः हरन्नस्ति। तत्र यावान् कालः उत्तमश्लोकस्य वार्तां विना व्येति स सर्वोऽपि निरर्थक इति अभिप्रैति श्रीमद्भागवतम् –

**आयुर्हरति वै पुंसामुद्यन्नस्तं च यन्नसौ ।**
**तस्यर्ते यत्क्षणो नीत उत्तमश्लोकवार्तया ।।**[१]

एवं सति भगवत्कथानिरतस्य आयुर्हरणाभावेन नासौ म्रियेत इति शङ्कामुपस्थाप्य समाहितं श्रीचक्रवर्तिपादेन – "नन्वेवं चेत् आयुर्हरणाभावात् कृष्णवार्ताऽपि तत्क्षणे जनो न म्रियते? सत्यम्। सत्पात्रीकृतवित्तो जनोऽक्षयवित्तो यथोच्यते, परत्र तद्भोगानन्त्यप्राप्तेः। "समब्राह्मणे दानं द्विगुणं ब्राह्मणब्रुवे। प्राधीते शतसाहस्रममन्तं वेदपारगे।।" इति स्मृतेः। तथैव कृष्णसात्कृतायुर्जनः परत्र तत्पार्षदत्वप्राप्त्या ध्रुवमक्षयायुर्भवतीति कृष्णभक्तस्यायुर्हरणाभावो ज्ञेयः।"[२]

किञ्च भगवत्कथाया भगवदभिन्नत्वेन भगवतश्च कालातीतत्वेन तत्कथानिरतोऽपि जनः तादृगेवेति निश्चिन्वति तद्विदः। अतो विशुद्धभक्तिमन्दकिन्याः भगवत्कथास्रोतसि जीवानवगाहयितुं भगवदभिन्नस्य श्रीमद्भागवतस्य अवतारो भूतले । श्रीकृष्णस्य सर्वानवयवानेव साक्षात्कुर्वते भागवताः भागवतस्य द्वादशस्कन्धेषु । तथा हि –

**पादौ यदीयौ प्रथमद्वितीयौ**
**तृतीय-तुर्यौ कथितौ यदूरू।**
**नाभिस्तथा पञ्चम एव षष्ठो**
**भुजान्तरं दोर्युगलं तथान्यौ।।**
**कण्ठस्तु राजन् नवमो यदीयो**
**मुखारविन्दं दशमः प्रफुल्लम्।**
**एकादशो यस्य ललाटपट्टं**
**शिरोऽपि च द्वादश आमनन्ति।।**
**तमादिदेवं सुहितावतारं**
**तमासवर्णं करुणानिधानमस।**
**अपारसंसारसमुद्रसेतुं**
**भजमहे भागवतस्वरूपम्।।**[३]

एतद्विवेचनेन पुरुषस्य ललाटपट्टं यथा सकलज्ञानकेन्द्रं तथैव श्रीमद्भागवतस्य एकादशः स्कन्धः सकलदिव्यज्ञानविज्ञाननिधानमस्तीति निर्धार्यते सुधीधौरेयैः । तत्रापि-

**अत्र सर्गो विसर्गश्च स्थानं पोषणमूतयः ।**
**मन्वन्तरेशानुकथा निरोधो मुक्तिराश्रयः ।।**[४]

इति दिशा दशलक्षणलक्षितस्य श्रीमद्भागवतस्य मुक्तिपदार्थनिर्णायक एकादशस्कन्ध इति स्कन्धस्यास्य

किमपि वैलक्षण्यं तत्त्वापदेष्टृत्वञ्चानुभूयते भव्यैः। तस्मात् एतस्यैव एकादशस्कन्धस्यानन्तसौरभं विविरत्सु कानिचन अवचेतुं क्रियते कश्चन लघुप्रयासः। श्रीमद्भागवतार्थप्रसूनचयनप्रयोजनके दुर्गमेऽस्मिन् पथि पदनिक्षेपं समीहतो जनस्यास्य सत्तां भागवतानां कृपायाष्टिरेव परमावलम्बनम्।

एकोत्तरत्रिंशदध्याययुतः एकादशः स्कन्धः श्रीमद्भागवतस्य। तत्र प्रथमेऽध्याये भगवता स्वकुलक्षयार्थं चिन्तनं, विप्रशापश्च। ततश्चुतर्भिध्यायैः वसुदेवनारदसंवादान्तर्गतः निनिनवयोगीश्वरसंवादः। तदुत्तराध्यायेन ब्रह्मादिदेवानां भगवत्स्तुतिः। तत्परवर्तिभिः त्रयोविंशत्या अध्यायैः श्रीकृष्णोद्धवसंवादः, उपान्त्येन एकोत्तरत्रिशदध्यायः स्कन्दस्यास्य। तत्र पूर्वस्मिन् दशमे स्कन्धे दशमम् आश्रयतत्त्वं न्यरूपि । तेन सर्वाश्रयस्य स्वयं भगवतश्च विचित्रचरितामृतवितरणेन तद्भक्तसुमनसो विस्माप्य तच्चरणपरिचरणनिरतां मुक्तिं निरूपयितुम् उपक्रमते परवर्तिनि एकदशे स्कन्धे ग्रन्थकृत् ।

भगवान् श्रीकृष्णः स्वये बलरामेण सह पूतना-धेनुक-केशि-कंस-जरासन्ध-प्रभृतीन् दैत्यान् अहन्। किञ्च कौरवपाण्डवयोः कलहव्याजेन तयोः युद्धं निमित्तीकृत्य दुष्टान् कौरवान् अनेकान् दुष्टराजवर्गान् अघातयत् । ये पाण्डुपुत्राः कपटद्यूतक्रीडादिषु बहुशः दुर्योधनादिभिः कोपिता आतन् तानेव अर्जुनादीन् हेतुं कृत्वा उभयोः पक्षयोः मिलितान् राज्ञः हत्वा पृथिवायः गुरुभारं भगवान् जहार । अप्रमेयः दुस्तर्क्यलीलः श्रीकृष्णः स्वभुजबलपालितैः यदुभिः दुष्टराजन्यान् निरस्य इदं परामम‍र्श - “यद्यपि लोकप्रतीत्या भूभारः अपहृतस्तथाप्यहं भारमनपहृतमेव मन्ये। यतः सर्वथाऽपि अविषह्यं यादवं कुलं वर्तत एव” (१/१-३) ।

वस्तुतः यादवाः परमधार्मिकाः कृष्णैकप्राणाश्च। तेषां न भूभाररूपत्वं तथापि तेषु अविष्टानां देवानां स्वलोकप्रापणाय व्याजेन भारत्वमाख्यायते। अतः “यदून् यदुभिरन्योनं भूभारान् संजहार ह” – इति श्लोकं व्याचक्षाणः श्रीचक्रवर्तिपादः- “तदपि भूभारभूतान् यदूनित्यर्जुनोक्त्या न तु भुवोऽलङ्कारभूतान् यदून् तन्नित्यपरिकरानित्यर्थस्तु उपलभ्यत एव । नारी खलु अलङ्काराणां भारं न मन्यते यथा तथैव भूनित्यपरिकराणां यदूनाम्। ये तु देवास्तत्रैव यदुवेशावतारेण प्रविश्योद्भूतास्तेषामपि रजस्तमोरहितानां भारत्वेन वक्तुम् अनुचितानामपि स्वस्वपदप्रापणाय तन्मिषेणैवोपसंहारार्थम्”[५]।

किञ्च यथा सुकुमार्या वनिताया अतिबहुतरभूषणभारोऽपि तत्कान्तेन अपसार्यत तथा परमधार्मिकनामपि यदूनामसंख्यत्वेन तेषां भारो भगवता अपासार्यत इति भावः। परमैश्वर्ययुक्तस्य भगवदाश्रितस्य यदुवंशस्य अन्येन केनापि हेतुना परिभवमसंभाव्य तत्र अन्तःकलहेनैव वेशस्य नाशं निरचिनोत् श्रीकृष्णः । वेणुसमूहस्य परस्परमथनाज्जातो वह्निः यथा तद्वनं दहति तथैव यदुवंशम् इमं परस्परकलहजन्योऽग्निः नाशयेत्; स च कसहः विप्रशापेन एवं सम्भवेदिति सत्यसंकल्पस्य भगवतोऽभिप्रायः। (१/४/५) ।

वस्तुतो भगवता स्वावतारस्य सर्वाणि प्रयोजनानि साधितान्येव आसन्। भूभारहरणं तदवतारस्य वाह्यं प्रयोजनम् आसीत्; अन्तरङ्गं प्रयोजनं जनेभ्यः प्रेमप्रदानं च। भूभारहरणेन समं भगवता सर्वेऽपि प्रेम्णा सरसीकृता एव। तथा हि भगवतः परमरमणीयश्रीमूर्त्तेः सर्वलोकरूयं लावण्यं प्रतिपदं निर्गच्छत् आसीत्; तस्य तां परमलावण्यमयीं मूर्तिं सकृदेव यः निरैक्षत तस्य तदितरवस्तुदर्शने नयनयोः प्रवृत्तिरेव न भवेत्; येन भगवतश्चित्रार्थपदा वाणी श्रुता न तस्य कर्णयोः शब्दान्तरश्रवणे स्पृहा उत्पद्यत। यश्च भगवतो ध्वजवज्राद्यङ्कितानि चरणचिह्नानि साक्षाद्करोत् तस्य गमनादि क्रियान्तरमेव अवरुद्धमभवत् । भगवन्तं स्मरतां चित्तं तु तेन अपहृतं तथाभूतमासीत् येन; सः वस्त्वन्तरं स्मर्तुमेव न प्रभवेत्। एवं तत्कालीनजनान् प्रेममयान् विधाय भविष्यज्जनान् समुद्धर्तुं भगवता परमपवित्रा कीर्तिरपि जगति विस्तृता। कविवरैरीहितां तत्कीर्तिकौमुदीं समास्वाद्य भविष्यति जनिष्यमाणा जना अपि प्रेमपारावारनिमग्नाः भवेयुरिति तात्पर्यम्। एवंरूपेण सपादशतवर्षावधौ स्वावतारकाले स्वीयचिकीर्षिचं भगवता सर्वमपि साधितमेव। अतः यदुकुलस्य विप्रशापव्याजेन नाशं विधाय लोकलोचनागोचरी भवितुं भगवतो निश्चयः समजायत –

**स्वमूर्त्या लोकलावण्यनिमुक्त्या लोचनं नृणाम्।**
**गीर्भिस्ताः स्मरतां चित्तं पदैस्तानीसतां क्रियाः।**
**आच्छिद्य कीर्तिं सुश्लोकां वितत्य ह्यञ्जसा नु कौ।**
**तमोऽनया तरिष्यतीत्यगात् स्वं पदमीश्वरः।।**[६]

कृष्णोवतीर्य नृणां चक्षुरादिसर्वस्वं हृत्वा तानन्धमूकवधिरजडोन्मत्तान् एव अकरोदित्यतः कस्तं दयालुं वदेन्महाचौर एव स इति व्याजस्तुतिः। वस्तुतस्तु सः दैत्येभ्योऽपि संहृत्य मुक्तिं ददौ; तदन्येभ्यस्तु स्वसौन्दर्य-सौशब्द्य-सौरस्यादि-लावण्यसिन्धौ निमज्य प्रेमणमेव ददाविति एतावान् निरुपाधिदयालुर्नास्ति कोऽपीति भावः।

क्रमशः ..................।

**सन्दर्भाः –**


१. श्रीमद्भागवतम् – १ / ३ / १७ ।

२. तत्रैव सारार्थदर्शिन्याम् ।

३. श्रीमद्भागवतमाहात्म्ये पद्मपुराणवचनम् ।

४. श्रीमद्भागवतम् – २ /१०/१ ।

५. तत्रैव सारार्थदर्शिन्याम् – १/ १५/ २६ ।

६. श्रीमद्भागवतम् – ११ /१ /६-७ ।